श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - २५

*नरसिंहावतारवर्णनम्*

स्तम्भे घट्टयतो हिरण्यकशिपोः कर्णौ समाचूर्णय-
    न्नाघूर्णज्जगदण्डकुण्डकुहरो घोरस्तवाभूद्रवः।
श्रुत्वा यं किल दैत्यराजहृदये पूर्वं कदाप्यश्रुतं
    कम्पः कश्चन संपपात चलितोऽप्यम्भोजभूर्विष्टरात्॥ १ ॥

दैत्ये दिक्षु विसृष्टचक्षुषि महासंरम्भिणि स्तम्भतः
    सम्भूतं न मृगात्मकं न मनुजाकारं वपुस्ते विभो।
किं किं भीषणमेतदद्भुतमिति व्युद्भ्रान्तचित्तेऽसुरे
    विस्फुर्ज्जद्धवलोग्ररोमविकसद्वर्ष्मा समाजृम्भथाः॥ २ ॥

तप्तस्वर्णसवर्णघूर्णदतिरूक्षाक्षं सटाकेसर-
    प्रोत्कम्पप्रनिकुम्बितांबरमहो जीयात्तवेदं वपुः।
व्यात्तव्याप्तमहादरीसखमुखं खड्गोग्रवल्गन्महा-
    जिह्वानिर्गमदृश्यमानसुमहादंष्ट्रायुगोड्डामरम्॥ ३ ॥

उत्सर्पद्वलिभङ्गभीषणहनुं ह्रस्वस्थवीयस्तर-
    ग्रीवं पीवरदोश्शतोद्गतनखक्रूरांशुदूरोद्बणम्।
व्योमोल्लङ्घि घनाघनोपमघनप्रध्वाननिर्द्धावित-
    स्पर्धालुप्रकरं नमामि भवतस्तन्नारसिंहं वपुः॥ ४ ॥

नूनं विष्णुरयं निहन्म्यमुमिति भ्राम्यद्गदाभीषणं
    दैत्येद्रं समुपाद्रवन्तमधृथा दोर्भ्यां पृथुभ्याममुम्।
वीरो निर्गळितोऽथ खड्गफलके गृह्णन् विचित्रश्रमान्
    व्यावृण्वन् पुनरापपात भुवनग्रासोद्यतं त्वामहो॥ ५ ॥

भ्राम्यन्तं दितिजाधमं पुनरपि प्रोद्गृह्य दोर्भ्यां जवात्
द्वारेऽथोरुयुगे निपात्य नखरान् व्युत्खाय वक्षोभुवि।
निर्भिन्दन्नधिगर्भनिर्भरगळद्रक्ताम्बु बद्धोत्सवं
पायं पायमुदैरयो बहु जगत्संहारिसिंहारवान्॥ ६ ॥

त्यक्त्वा तं हतमाशु रक्त लहरीसिक्तोन्नमद्वर्ष्मणि
प्रत्युत्पत्य समस्तदैत्य पटलीं चाखाद्यमाने त्वयि।
भ्राम्यद्भूमि विकम्पिताम्बुधि कुलं व्यालोलशैलोत्करं
प्रोत्सर्पत्खचरं चराचरमहो दुःस्थामवस्थां दधौ॥ ७ ॥

तावन् मांसवपाकराळवपुषं घोरान्त्रमालाधरं
त्वां मध्येसभमिद्धकोपमुषितं दुर्वारगुर्वारवम्।
अभ्येतुं न शशाक कोपि भुवने दूरे स्थिता भीरवः
सर्वे शर्वविरिञ्चवासव मुखाः प्रत्येकमस्तोषत॥ ८ ॥

भूयोऽप्यक्षतरोषधाम्नि भवति ब्रह्माज्ञया बालके
प्रह्लादे पदयोर्नमत्यपभये कारुण्यभाराकुलः।
शान्तस्त्वं करमस्य मूर्ध्नि समधाः स्तोत्रैरथोद्गायत-
स्तस्याकामधियोऽपि तेनिथ वरं लोकाय चानुग्रहम्॥ ९ ॥

एवं नातितरौद्रचेष्टित विभो श्रीतापनीयाभिध-
श्रुत्यन्तस्फुटगीतसर्व महिमन्नत्यन्तशुद्धाकृते।
तत्तादृङ्निखिलोत्तरं पुनरहो कस्त्वां परो लङ्घयेत्
प्रह्लादप्रिय हे मरुत्पुरपते सर्वामयात्पाहि माम्॥ १० ॥

**********